International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(3): 47-50
© 2026 IJMH
www.themultijournal.com
Received: 22-04-2026
Accepted: 16-05-2026
Publish : 18-05-2026

**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# रामभद्रसाहस्रमञ्जरीस्तोत्रेषु शब्दालङ्काराः

## कोलुसु गोविन्दराजुलु

**सारांशः** - प्रस्तुते शोधलेखे राष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधच्छात्रेण कोलुसु गोविन्दराजुलुवर्येण महाकवेः श्रीरामभद्रदीक्षितस्य स्तोत्रकाव्येषु **शब्दालङ्काराणां** विन्यासात्मकं विवेचनं विहितम्। काव्ये रसस्य सौन्दर्यवर्धकाः अलङ्काराः इति सिद्धान्तं दण्डि-मम्मट-विश्वनाथादीनां लक्षणैः सह उपस्थाप्य, कवेः शब्दगुम्फनचातुरी प्रदर्शिता। कवेः 'रामस्तवकर्णरसायन', 'रामचापस्तवादि' ग्रन्थेषु अनुप्रासस्य (छेका-वृत्त्या-अन्त्या-लाटादिभेदानां) तथा यमकालङ्कारस्य श्रुतिमधुरः प्रयोगः प्राप्यते। विशेषतः, वर्णानां पुनरावृत्तिः, पादान्तसमता, लाटजनप्रिया पदपुनरुक्तिः च कवेः शब्दाडम्बरं पाण्डित्यं च प्रमाणीकुर्वन्ति। निष्कर्षतः, एतानि स्तोत्राणि केवलं भक्तिपरकाणि न भूत्वा शब्दवैचित्र्यपूर्णानि सन्ति।

**कूटशब्दाः** - शब्दालङ्कारः अन्वयव्यतिरेकः वर्णसाम्यम् छेकानुप्रासः वृत्त्यनुप्रासः उपनागरिकावृत्तिः परुषावृत्तिः कोमलावृत्तिः अन्त्यानुप्रासः श्रुत्यनुप्रासः लाटानुप्रासः स्वरव्यञ्जनसंहतिः समानजातिकौ शब्दाडम्बरः सङ्कर-संसृष्टिः ।

**काव्येऽलङ्कारस्य स्थानम्**- अलङ्काराः काव्यात्मस्थानीयस्य रसस्य सौन्दर्यवर्धकाः भवन्ति । साधारतया मानवस्य भावनायाः उद्दीपनाय अनुरञ्जनाय च काव्ये अलङ्कारः प्रधानं स्थानं भजते । उच्चारणेषु झंकार-औज्वल्य-शब्दगुम्फ-अर्थप्रौढी-उक्तिवैचित्र्य-स्वाभाविकता-अग्राम्यत्वादीनां समावेशं विना भावनायारुद्दीपनमसम्भवम्, उद्दीपनाभावे च अनुरञ्जनं प्रवृत्तिहीनम् भवति । अतः शब्दानामलङ्करणं विदुषां परमध्येयमास्ते । अत उच्यते -

**जयन्ति ते पञ्चमनादमित्रचित्रोक्तिसन्दर्भविभूषणेषु ।**
**सरस्वती यद्वदनेषु नित्यमाभाति वीणामिव वादयन्ती ॥**[1]

अपि च कादम्बर्यामुच्यते -

**कटुक्कणन्तो मलदायकाः खला-**
**स्तुदत्यलं बन्धनशृङ्खला इव ।**
**मनस्तु साधुध्वनिभिः पदे पदे**
**हरन्ति सन्तो मणिनूपुरा इव ॥**[2]
**हरन्ति कं नोज्ज्वलदीपकोपमै-**
**र्नवैः पदार्थैरुपमादिना कथाः ।**
**निरन्तरश्लेषघनाः सुजातयो**
**महास्रजश्चम्पककुड्मलैरिव ॥**[3]

प्रसन्नगम्भीरपदा सुखश्रुतिः सरस्वती विविधविविक्तवर्णाभरणैः संश्लिष्टा सदैव पण्डितानां हृदयानि विदीर्य तान् प्रसादयन्ती प्रवर्त्तते इत्युद्घोषयन् महाकविर्भारविः अलङ्कारशोभितकाव्यस्य महत्त्वं प्रतिपादयति । एतादृशेन काव्येन सहृदयानामेव लाभः इत्यवगम्यते । यथा -

**विविक्तवर्णाभरणा सुखश्रुतिः,**
**प्रसादयन्ती हृदयान्यपि द्विषाम् ।**
**प्रवर्त्तते नाकृतपुण्यकर्मणां,**
**प्रसन्नगम्भीरपदा सरस्वती ॥**[4]

विद्यारामकविमतेन यथा हाराद्यलङ्काराः कुरूपं रूपवन्तं कुर्वन्ति तथैवैतेऽलङ्काराः काव्यशोभां विवर्द्धयन्ति। यथा –

**अलङ्कारास्तु काव्यस्य सच्छोभाकारका: स्मृता: ।**

**यथा हारादिका भूषा: कुरूपस्यापि रूपदा: ।।**[5]

**अलङ्कारलक्षणम्** - अलङ्कारस्य लक्षणं बहुधा बहुभिराचार्यैः निरूपिता। तत्र काव्यादर्शकार: दण्डी लिखति –

**काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।**

**ते चाद्यापि विकल्प्यन्ते कस्तान् कात्स्न्र्येन वक्ष्यति ।।**[6]

ध्वन्यालोककारः आनन्दवर्धनाचार्यः वदति -

**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणा: स्मृता: ।**

**अङ्गाश्रितास्त्वलङ्कारा: मन्तव्या: कटकादिवत् ।।**[7]

काव्यप्रकाशकारेण मम्मटेनोच्यते –

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।**

**हारादिवदलङ्कारास्तेऽनुप्रासोपमादय: ।।**[8]

साहित्यदर्पणकर्ता कविराजविश्वनाथोऽपि अलङ्कारं लक्षयति यथा–

**शब्दार्थयोरस्थिरा ये धर्मा: शोभातिशायिन: ।**

**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।**[9]

**अलङ्कारभेदाः** - सामान्यतया आलङ्कारिकैरलङ्कारस्य विभाजनं त्रिधा क्रियते। यथा - शब्दालङ्कार:, अर्थालङ्कार:, उभयालङ्कारश्चेति । भरतादारभ्य अद्यावधि सर्वेषाम् आलङ्कारिकाणां ग्रन्थानुशीलनाज्ज्ञायते यदलङ्कारा: प्रमुखतया त्रिविधा एव भवन्ति। अलङ्काराणां व्यवस्थितप्रयोग: नाट्यशास्त्रत एव सञ्जात: । तत्रालङ्काराश्चतुर्विधा: प्रतिपादिता: । यथा -

**उपमा रूपकं चैव दीपकं यमकं तथा ।**

**काव्यस्यैते ह्यलङ्काराश्चत्वार: परिकीर्त्तिता: ।।**[10].

अत्र उपमा-रूपक-दीपकालङ्कारा: त्रय: अर्थालङ्कारा: भवन्ति तथा च यमकं शब्दालङ्कारकोटौ आगच्छति । तदनन्तरं भामह: शब्दार्थालङ्कारद्वयं स्वीकरोति । परन्तु तत्र भेदानां स्पष्टतः उल्लेखो न वर्तते। आचार्य: दण्डी अलङ्काराणां शब्दार्थाख्यभेदद्वयं परोक्षतया अङ्गीकरोति । एतेषां परवर्त्याचार्येषु उद्भटवामनादयोऽपि स्पष्टतया अलङ्काराणां वर्गीकरणं न कृतवन्त: ।

अलङ्काराणां वर्गीकरणप्रयास: सर्वप्रथमतया रुद्रटेन काव्यालङ्कारे कृत: । महानुभवोऽयं अर्थालिङ्कारान् चतुर्षु वर्गेषु विभाजयति । यथा - १) वास्तववर्ग:, २) औपम्यवर्ग:, ३) अतिशयवर्ग:, श्लेषवर्गश्चेति । तदुक्तं तेन -

**अर्थस्यालङ्कारा वास्तवमौपम्यमतिशय: श्लेष: ।**

**एषामेव विशेषा अन्ये तु भवन्ति नि:शेषा: ।।**[11] इति

सरस्वतीकण्ठाभरणरचयिता भोजराज: स्पष्टतोऽलङ्कारान् त्रिषु विभागेषु विभाजयति । यथा – १) शब्दालङ्कार: २) अर्थालङ्कार: ३) उभयालङ्कारश्चेति । तदुक्तं तेन -

**शब्दार्थोभयसंज्ञाभिरलङ्कारान् कवीश्वरा: ।**

**बाह्यानाभ्यन्तरान् बाह्याभ्यन्तरांश्चानुशासति ।।**[12] इति ।

काव्यप्रकाशे मम्मटोऽपि अन्वयव्यतिरेकपक्षं स्वीकृत्य अलङ्कारस्य त्रैविध्यमङ्गीकरोति । यथा – **"इति प्रतिपादिता: शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलङ्कारा:"**[13] इति ।

**रामभद्रसाहस्रमञ्जरीस्तोत्रेषु शब्दालङ्काराः** – आचार्यः रामभद्रदीक्षितमहोदयः अलङ्कार-प्रयोगपटुः सर्वेष्वपि स्तोत्रेषु शब्दाडम्बरं प्रदर्शयति। अनुप्रास-यमक-वक्रोक्ति-उपमा-दीपक-रूपक-अतिशयोक्ति-व्यतिरेकाद्यलङ्काराणां विनिवेशने तस्य प्रतिभा श्लाघनीयैव । कवेः प्रत्येकमपि स्तोत्रम् अनुप्रासालङ्कारप्रधानं भवति । कविः बहुत्र शब्दाडम्बरं प्रदर्शयति । विशिष्टता रामाष्टप्रासस्तुतिः तस्यानुप्रासयोजनायाः प्रकृष्टमुदाहरणं भवति । अधुना तस्य स्तोत्रेषु प्रयुक्तानां केषाञ्चनालङ्काराणां सलक्षणम् उदाहरणं परिशीलयामः । विशिष्टतया अलङ्काराणां सङ्करः संसृष्टिश्च बहुधा दृश्यते ।

**(1) अनुप्रासः** – रसाद्यनुकूलतया वर्णानां न्यास: अनुप्रास: । मम्मटेनोच्यते –**"वर्णसाम्यमनुप्रास:"**[14] इति । यत्र अव्यवधानेन वर्णानां समता वर्तते तत्रानुप्रास: । अनुप्रास: वर्णगतशब्दगतभेदेन द्विधा विभज्यते । वर्णानुप्रास: छेकवृत्तिगतत्वेन द्विविध: ।

**छेकानुप्रास: - "सोऽनेकस्य सकृत्पूर्व:"**[15] । अनेक व्यञ्जनवर्णस्य स्वरूपत: क्रमतश्चैकवारमात्रसाम्यं यत्र भवति तत्र च्छेकानुप्रास: । साहित्यदर्पणे उच्यते – **"छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा"**[16]। अनेकधा नाम स्वरूपत: क्रमतश्च ।

**वृत्त्यनुप्रास: - "एकस्याप्यसकृत् पर:"**[17] । अर्थात् यत्र एकस्यानेकस्य वा व्यञ्जनवर्णस्य वारंवारं साम्यं भवति तत्र वृत्त्यनुप्रास: । वृत्त्यनुप्रासेऽस्मिन् माधुर्यव्यञ्जकवर्णै: रचिता उपनागरिकावृत्ति:, ओजोव्यञ्जकवर्णै: परुषावृत्ति:, प्रसादव्यञ्जकैर्वर्णै: रचिता कोमला वृत्तिश्च अन्तर्भवति ।

**अन्त्यानुप्रासः** - साहित्यदर्पणे अन्त्यानुप्रास:, श्रुत्यनुप्रास इति भेदद्वयं स्वीकृतम् । तत्र अन्त्यानुप्रासस्य लक्षणं यथा -

**व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु ।**

**आवर्त्यन्तेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ।।**[18]

श्रुत्यनुप्रासः - श्रुत्यनुप्रासलक्षणमपि एवमस्ति -

**उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।**

**सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ।।**[19]

शब्दगतानुप्रास: लाटानुप्रास इत्युच्यते । तल्लक्षणं यथा – **"शाब्दस्तु लाटानुप्रास: भेदे तात्पर्यमात्रत:"**[20] इति। भिन्नतात्पर्य्ययुक्ततुल्यार्थकशब्दानां यत्र समता विद्यते तत्र लाटानुप्रास:।

भक्तकविश्रीरामभद्रदीक्षितवर्यस्य काव्येषु अनुप्रासबाहुल्यं दृश्यते । कानिचनोदाहरणानि अत्रप्रस्तूयन्ते । यथा -

**रणप्रवणरावणव्रणदबाणमोक्षक्षण-**

**क्वणगुणधनुर्ध्वनित्वरितमारितारिव्रजः ।**

**जगद्दुरितजर्जरीकरणजागरूकक्रमो**

**मम व्यपनयेद्भयं मनुकुलप्रवीराग्रणीः ।।**[21]

अस्मिन् श्लोके णेति व्यञ्जनवर्णस्य बहुधा साम्यात् वृत्त्यनुप्रासः । अपि च, मोक्षक्षण इत्यत्र क्षकारस्य सकृत्साम्यमपि अस्तीति छेकानुप्रासः । त्वरितमारितेत्यत्र शाब्दः लाटानुप्रासः । अपि चि,

**वन्दे तमिन्दीवरदामनीलं वन्दारुमन्दारपदारविन्दम् ।**
**रामं सुरामङ्गलकृद्विरामं क्षेमंकरामन्दशराभिरामम् ।।**[22]

इत्यस्मिन् पद्ये न्द-द-व-म-र-वर्णानां सकृद् बहुवारं च साम्यात् वृत्त्यनुप्रासः । अपि च तृतीय-चतुर्थपादयोः रामम् – रामम् इति अन्त्यवर्णसाम्यात् अन्त्यानुप्रासोऽपि भवति । अपि च राम-शब्दस्य बहुधा साम्यं दृश्यते इति लाटानुप्रासोऽपि अङ्गीकर्तव्यः । अपि च,

**गौरीतातगिरीशमञ्जुलदरीकेलीधुरीणामरी-**
**वीणोरीकृतवैखरीमधुझरीपारीणरीतिक्रमम् ।**
**मारीचारिधनुः सरीसृपपुरीनारीजनैरीडितं**
**सारीकृत्य सरीसरीतु हृदि मे भूरीर्वचोमञ्जरीः ।।**[23]

इत्यत्रापि गौरीतातगिरिश इत्यत्र गौरी-गिरि-शब्दयोः उभय-ग-र-वर्णौ स्वरूपतः साम्यं भजतः । अतः छेकानुप्रासः । एवं 'री' इति वर्णस्य अनेकधा साम्याद् वृत्त्यनुप्रासः ।

लाटानुप्रासस्य प्रकृष्टमुदाहरणं यथा –

**यमार्यमादिपश्चकक्रियोपभोगिभीतिदं**
**यमार्यमाहुरागमा महात्मनामिहाश्रये ।**
**विभावरीचरेश्वरप्रभावदावपावके**
**विभावरीणवैभवे मनो विनोदमेति मे ।।**[24]

अत्रानेकपदानां पौनरुक्त्यं दृश्यते । एषः प्रायेण लाटजनप्रियत्वाल्लाटानुप्रासः । अन्त्यानु-प्रासस्यानदुदाहरणं यथा -

**नूतनागमघनाभशरीरे भूतनाथधनुरक्षमसारे ।**
**पूतनामनि मनो यदि रामे यातना न भविता यमतो मे ।।**[25]

अत्र पादान्त्यानुप्रासः । अपि च,

**दयारसधुरीणया दमिषु दत्तकल्याणया**
**दरीसदृशतूणया दलिरावणप्राणया ।**
**मलीमसविदूरया मनुकुलोदिताकारया**
**मनःसुकृतधारया मम हृतं महोदारया ।।**[26]

अत्र पदान्त्यानुप्रासः । एवमन्यान्युदाहरणानि द्रष्टव्यानि ।

**(2) यमकम्** – यमौ द्वौ समानजातिकौ तत्प्रतिकृतिः यमकम् । "इवे प्रतिकृतौ" इति पाणिनिसूत्रेण कन् प्रत्ययः । यमयति श्रुतिमधुरतया सचेतसां हृदयमानन्दयति स्वरव्यञ्जन-संहतिक्रमनिवेश्यत्वेन नियम-यतीति यमकम् । भिन्नार्थयोः अर्थरहितयोर्वा पदयोः अथवा भिन्नार्थानामर्थरहितानां वा पदानामेकत्रावस्थानेन यमकालङ्कारः । तदुच्यते – **"अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः । यमकम् ……"**[27] इति। अर्थात् अर्थे विद्यमाने अविद्यमाने वा भिन्नार्थयुक्त-वर्णानां यत्र तेनैव क्रमेणावृत्तिर्जायते तत्र यमकालङ्कारः । उक्तं च विश्वनाथेन -

**सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।**
**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।।**[28] इति ।

श्रीरामभद्रदीक्षितवर्यस्य स्तोत्रेषु अस्योदाहरणं यथा -

**धन्या वयं धरणिकन्यकया सनाथे**
**नाथे स्थिते जगति नः परिपालनाय ।**
**यः शीलितो यतिभिरात्मनि निष्कलङ्के**
**लङ्केश्वरं लवितुमात्तमनुष्यरूपः ।।**[29]

अस्मिन् श्लोके सनाथे नाथे इत्यत्र नाथे इति सार्थकवर्णानां भिन्नार्थत्वे सति क्रमेण तेनैवावृत्त्या यमकं नामालङ्कारः । तथैव निष्कलङ्के लङ्केश्वर इत्यत्र निरर्थकयोः लङ्के इति वर्णयोः क्रमेणावृत्त्याऽपि यमकम् ।

**उपसंहारः**

उपोद्घात-लक्षण-उदाहरणानां साङ्गोपाङ्गपरिशीलनेन स्पष्टं भवति यत् श्रीरामभद्रदीक्षितः न केवलं रससिद्धः कविः, अपितु **शब्दशिल्पी** अपि आसीत्। तस्य स्तोत्रेषु अलङ्काराणां सन्निवेशः आयासपूर्वकं न भूत्वा गङ्गाप्रवाहवत् स्वाभाविकः नैसर्गिकश्च प्रतीयते। कवेः अनुप्रासयोजनायां लाट-वृत्त्याद्यनुप्रासानां प्राचुर्यं सहृदयानां श्रवणपुटेषु पीयूषवर्षं करोति। यमकस्य प्रयोगे सार्थकानर्थकवर्णानां या क्रमिकी आवृत्तिः कृता, सा कवेः असाधारणं भाषाप्रभुत्वं सूचयति। स्तोत्रेषु भक्तिरसस्य तरङ्गेण साकं शब्दालङ्काराणां झङ्कारः मिलित्वा काव्यस्य आल्हादकत्वं द्विगुणीकरोति। अतः कवेः एषा शब्दालङ्कारयोजना तस्य शैल्याः वैशिष्ट्यं दाक्षिणात्यकाव्यपरम्परायाः गौरवञ्च प्रकटीकरोति इति शम्।

**सहायकग्रन्थाः**


- **काव्यप्रकाशः**: मम्मटाचार्यविरचितः, (नवम-दशमउल्लासौ), आचार्यविश्वेश्वरसिद्धान्तशिरोमणि- टीकासहितः, ज्ञानमण्डल लिमिटेड, वाराणसी, संस्करणम्-२०१२।
- **साहित्यदर्पणः**: कविराजविश्वनाथप्रणीतः, (दशमपरिच्छेदः), डॉ. सत्यव्रतसिंहकृत 'कुसुमप्रतिमा' व्याख्यासहितः, चौखम्बा विद्याभवन, वाराणसी, संस्करणम्-२०१५।
- **काव्यादर्शः**: महाकविदण्डिविरचितः, आचार्यरामचन्द्रमिश्रकृत 'प्रकाश' टीकासहितः, चौखम्बा विद्याभवन, वाराणसी, संस्करणम्-२००८।
- **नाट्यशास्त्रम्**: भरतमुनिप्रणीतम्, (षोडशाध्यायः), चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, संस्करणम्-२०१०।
- **काव्यालङ्कारः**: रुद्रटप्रणीतः, नमिसाधुटीकासहितः, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रणम्-२००५।
- **सरस्वतीकण्ठाभरणम्**: महाराजभोजराजविरचितम्, चौखम्बा ओरियन्टालिया, वाराणसी, संस्करणम्-२०११।
- **रामस्तवकर्णरसायनम् / रामचापस्तवः**: श्रीरामभद्रदीक्षितविरचितः, काव्याङ्कमाला मालिका, निर्णयसागर प्रेस, मुम्बई, प्राचीनसंस्करणम्-१८९७ / राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, संस्करणम्-२००४।
- **कादम्बरी (कथा)**: महाकविबाणभट्टविरचितः, पूर्वभागः, चौखम्बा संस्कृत संस्थान, वाराणसी, संस्करणम्-२०१३।

- **किरातार्जुनीयम्:** महाकविभारविविरचितम्, (चतुर्दशसर्गः), मल्लिकानाथसूरिकृत 'घण्टापथ' टीकासहितः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करणम्-२०१४।
- **संस्कृतसाहित्य में शब्दालंकार (आधुनिकविमर्शः):** डाँ. रामशरणशास्त्री, जगदीश संस्कृत पुस्तकालय, जयपुर, प्रकाशनवर्षम्-१९९८।


**पाद टिप्पणी –**

1. संस्कृतसाहित्य में शब्दालंकार इति पुस्तके उद्धृतम् (प्रथमालोक-पृ.१५)
2. काद. - श्लो.६
3. तत्रैव – श्लो.९
4. कि.अ. - १४/३
5. काव्येष्वलङ्कारसन्निवेशनविधौ उद्धृतः श्लोकः – अ.१/पृ. ४३
6. काव्यादर्शः - २/१
7. ध्वन्या. - २/७
8. का.प्रका. - ८/२
9. सा.द. - १०/१
10. ना.शा. - १६/४०
11. काव्यालंकारः - ७/९
12. सरस्वतीकण्ठाभरणम् - २/१
13. काव्यप्रकाशः - १०/१४१
14. का.प्र. – ९/सू.१०४
15. तत्रैव – सू.१०६
16. सा.द. - दशमपरिच्छेदे
17. का.प्र. – ९/सू.१०७
18. सा.द. – १०/६
19. तत्रैव – १०/५
20. का.प्र. – ९/सू.११२/का.८१
21. रा.स्त.क.र. – १/१५८
22. तत्रैव – २/१
23. रा.चा.स्त. – श्लो.१९
24. रा.स्त.क.र. – १/११९
25. रा.स्त.क.र. – २/७
26. तत्रैव – २/१०३
27. का.प्र. – ९/सू.११७
28. सा.द. – १०/का.८
29. रा.स्त.क.र. – १/९०